तोडितुम्, तोडयितुम्, तुतोडिषितुम्-तुतुडिषितुम्, तोतुडितुम्;
[1]तुट्टिः, तोडना, तुतोडिषा-तुतुडिषा, तोतुडा;
तोडनम्, तोडनम्, तुतोडिषणम्-तुतुडिषणम्, तोतुडनम्;
तोडित्वा-तुडित्वा, तोडयित्वा, तुतोडिषित्वा-तुतुडिषित्वा, तोतुडित्वा;
प्रतुड्य, प्रतोड्य, प्रतुतोडिष्य-प्रतुतुडिष्य, प्रतोतुड्य;
तोडम् २, तोडित्वा २-तुडित्वा २, } तोडम् २, तोडयित्वा २, } तुतोडिषम् २-तुतुडिषम् २, तुतोडिषित्वा २-तुतुडिषित्वा २, } तोतुडम् २; तोतुडित्वा २.

(739) "तुण कौटिल्ये" (VI-तुदादिः-1332. सक. सेट्. पर.)

तोणकः-णिका, तोणकः-णिका, तुतोणिषकः-तुतुणिषकः-षिका, तोतुणकः-णिका; इत्यादीनि सर्वाण्यपि रूपाणि गुफधातुवद् (409) बोध्यानि। क्विपि-प्रतूण्-प्रतूणौ-प्रतूणः; इति। शतरि तु—तुणन्-ती-न्ती; इति रूपाणीति विशेषः। घञि-[A]तोणः।

(740) "तुत्थ आवरणे" (X-चुरादिः-1943. सक. सेट्. उभ. अदन्तः।)[अ]

तुत्थकः-त्थिका, तुतुत्थयिषकः-षिका; तुत्थयिता-त्री, तुतुत्थयिषिता-त्री;
तुत्थयन्-न्ती, तुतुत्थयिषन्-न्ती; तुत्थयिष्यन्-न्ती-ती, तुतुत्थयिषिष्यन्-न्ती-ती; तुत्थयमानः, तुतुत्थयिषमाणः; तुत्थयिष्यमाणः, तुतुत्थयिषिष्यमाणः;
तुत्-तुत्थौ-तुत्थः; [B]तुत्थितः-तम्-तवान्, तुतुत्थयिषितः-तवान्;
तुत्थः, तुतुत्थयिषुः; तुत्थयितव्यम्, तुतुत्थयिषितव्यम्;
तुत्थनीयम्, तुतुत्थयिषणीयम्; तुत्थ्यम्, तुतुत्थयिष्यम्;
ईषत्तुत्थः-दुस्तुत्थः-सुतुत्थः; तुत्थ्यमानः, तुतुत्थयिष्यमाणः;

---

1. 'तितुत्र—' (7-2-9) इतीण्णिषेधे, 'ष्टुना ष्टुः' (8-4-41) इति ष्टुत्वम्।

A. 'नार्यः संमृडदालिकेलिपृडिता यस्मिन् पृणन्त्यः प्रियान्
नित्यं तैर्वृणिता मृणालकमनीयाङ्गचो वितोणाशयाः॥' धा. का. 2. 75.

B 'प्रपणितदिशं रुचा क्षपितभूभृतोऽस्यानुजाः
सदोनिवसितं हरिं ययुरतूत्थिताङ्गाः कथा।' धा. का. 3.64.

[अ] धातुकाव्ये (3-64) 'अतूत्थिताङ्गाः—' इत्युदाहरणदर्शनात् 'तूत्थ' इति तत्सम्मतः पाठ इति ज्ञायते।